# Shri Mahalakshmikrita Ganapati stotram

# શ્રીમહાલક્ષ્મિકૃતમ્ ગણપતિસ્તોત્રમ્

## Document Information

Text title : Ganapatistotram 1 Mahalaxmi

File name : gaNapatistotrammahAlakShmI.itx

Category : ganesha

Location : doc_ganesha

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : June 13, 2010

Send corrections to : Sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


June 13, 2020

*sanskritdocuments.org*

Shri Mahalakshmikrita Ganapati stotram

# શ્રીમહાલક્ષ્મિકૃતમ્ ગણપતિસ્તોત્રમ્

નમો મહાધરાયૈવ નાનાલીલાધરાય તે ।
સદા સ્વાનન્દસંસ્થાય ભક્તિગમ્યાય વૈ નમઃ ॥ ૧॥

અનન્તાનનદેહાય હ્યનન્તવિભવાય તે ।
અનન્તહસ્તપાદાય સદાનન્દાય વૈ નમઃ ॥ ૨॥

ચરાચરમયાયૈવ ચરાચરવિવર્જિત ।
યોગશાન્તિપ્રદાત્રે તે સદા યોગિસ્વરૂપિણે ॥ ૩॥

અનાદયે ગણેશાયાદિમધ્યાન્તસ્વરૂપિણે ।
આદિમધ્યાન્તહીનાય વિઘ્નેશાય નમો નમઃ ॥ ૪॥

સર્વાતિપૂજ્યકાયૈવ સર્વપૂજ્યાય તે નમઃ ।
સર્વેષાં કારણાયૈવ જ્યેષ્ઠરાજાય તે નમઃ ॥ ૫॥

વિનાયકાય સર્વેષાં નાયકાય વિશેષતઃ ।
ઢુણ્ઢિરાજાય હેરમ્બ ભક્તેશાય નમો નમઃ ॥ ૬॥

સૃષ્ટિકર્ત્રે સૃષ્ટિહર્ત્રે પાલકાય નમો નમઃ ।
ત્રિભિર્હીનાય દેવેશ ગુણેશાય નમો નમઃ ॥ ૭॥

કર્મણાં ફલદાત્રે ચ કર્મણાં ચાલકાય તે ।
કર્માકર્માદિહીનાય લમ્બોદર નમોઽસ્તુ તે ॥ ૮॥

યોગેશાય ચ યોગિભ્યો યોગદાય ગજાનન ।
સદા શાન્તિઘનાયૈવ બ્રહ્મભૂતાય તે નમઃ ॥ ૯॥

કિં સ્તૌમિ ગણનાથં ત્વાં સતાં બ્રહ્મપતિં પ્રભો ।
અતશ્ચ પ્રણમામિ ત્વાં તેન તુષ્ટો ભવ પ્રભો ॥ ૧૦॥

ધન્યાહં કૃતકૃત્યાહં સફલો મે ભવોઽભવત્ ।
ધન્યૌ મે જનકૌ નાથ યયા દૃષ્ટો ગજાનનઃ ॥ ૧૧॥

એવં સ્તુતવતી સા તં ભક્તિયુક્તેન ચેતસા ।
સાશ્રુયુક્તા બભૂવાથ બાષ્પકણ્ઠા યુધિષ્ઠિર ॥ ૧૨॥

તામુવાચ ગણાધીશો વરં વૃણુ યથેપ્સિતમ્ ।
દાસ્યામિ તે મહાલક્ષ્મિ ભક્તિભાવેન તોષિતઃ ॥ ૧૩॥

ત્વયા કૃતં ચ મે સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
પઠતાં શ‍ૃણ્વતાં દેવિ નાનાકાર્યકરં તથા ।
ધનધાન્યાદિસમ્ભૂતં સુખં વિન્દતિ માનવઃ ॥ ૧૪॥

ઇતિ શ્રીમહાલક્ષ્મિકૃતમ્ ગણપતિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*Shri Mahalakshmikrita Ganapati stotram*

pdf was typeset on June 13, 2020

Please send corrections to *sanskrit@cheerful.com*